

# १० अष्टादश-शताब्द्यां राजनीतिकरचना राजनैतिक्यः रचनाः

यदि भवन्तः प्रथमं मानचित्रं तथा च द्वितीयं मानचित्रम् अवधानेन द्रक्ष्यन्ति तर्हि भवन्तः ज्ञास्यन्ति यत् अष्टादशस्य शताब्दस्य पूर्वार्द्धकाले उपमहाद्वीपेषु काश्चन विशेषरूपेण उल्लेखनीयाः घटनाः जाताः । अवधानं कुर्वन्तु यत् अनेकेषां स्वतन्त्राणां राज्यानाम् उदयेन मुगलसाम्राज्यस्य सीमाः केन प्रकारेण परिवर्तिताः । भवन्तः एतत् अपि पश्यन्तु यत् १७६५ पर्यन्तं कयाचित् अन्यया सत्तया अर्थात् ब्रिटिशसत्तया पूर्व-भारतस्य विशालतमाः भागाः सफलतापूर्वकं निग्रहिताः। एते मानचित्रे अस्मान् सूचयतः यत् अष्टादशशताब्द्याः अवधिः कश्चन एतादृशः अवधिः आसीत्, यदा भारते राजनीतिकीनां परिस्थितीनां लघौ समयान्तराले सहसा एव परिवर्तनम् आरभत । अस्मिन् अध्याये वयम् अष्टादश-शताब्द्याः पूर्वार्द्धकाले (स्थूलतया १७०७ तमे वर्षे यदा औरङ्गजेबस्य मृत्युः अभवत्, ततः १७६१ पर्यन्तम्, यदा पानीपतस्य तृतीयं युद्धं जातम्) उपमहाद्वीपे उत्पन्नानां नूतन-राजनीतिकीनां शक्तीनां विषये पठिष्यामः ।

**मानचित्रम् -१**

अष्टादशे शताब्दे नूतनानां राज्यानां रचना






*मानचित्रम् -२*

*अष्टादश-शताब्द्याः मध्यकाले ब्रिटिशक्षेत्रम्*

## मुगल-साम्राज्याय परवर्तिनां मुगलानां कृते च सङ्कटस्य स्थितिः

चतुर्थे अध्याये अस्माभिः दृष्टं यत् केन प्रकारेण मुगलसाम्राज्येण स्वस्य सफलतायाः औन्नत्यम् अवाप्तं तथा च सप्तदशशताब्द्याः अन्तिमेषु वर्षेषु तस्य समक्षे विविधप्रकारकाणि सङ्कटानि उत्पन्नानि अभवन्। एवम् अनेकैः कारणैः अभवत्। सम्राजा औरङ्गजेबेन दक्कने (१६७९ तः) दीर्घावधिकं युद्धं कुर्वन् साम्राज्यस्य सैन्यानां तथा च वित्तीय-संसाधनानाम् अत्यधिकः व्ययः कृतः आसीत्।

औरङ्गजैबस्य उत्तराधिकारिणां शासनकाले साम्राज्यस्य प्रशासनस्य कार्यकुशलतायाः समाप्तेः आरम्भः अभवत्। मनसबदारजनानां शक्तिशालिवर्गाणां नियन्त्रणस्य संरक्षणं केन्द्रीयायाः सत्तायाः कृते कठिनम् अभवत्। प्रान्ताधिपतिरूपेण नियुक्ताः अभिजाताः प्रायेण राजस्वप्रशासनं सैन्य-प्रशासनं च इति उभयकार्यालयौ नियन्त्रयन्ति स्म। अनेन ते मुगलसाम्राज्यस्य विशालक्षेत्रेषु विस्तृताः राजनीतिकीः आर्थिकीः सैन्यशक्तीः च प्राप्तवन्तः। यथा यथा प्रान्ताधिपतयः प्रान्तेषु स्वीयं नियन्त्रणं सुदृढं कृतवन्तः तथा तथा राजधान्यां प्राप्यमाणस्य राजस्वस्य मात्रा न्यूना अभवत्।

*चतुर्थे अध्याये प्रथमाम् अनुक्रमणिकां पश्यन्तु। औरङ्गजेबस्य शासनकाले कैः कैः जनैः मुगलसत्तायाः कृते दीर्घं कालं यावत् आह्वानानि प्रदत्तानि।*

उत्तरभारतस्य पश्चिमभारतस्य च अनेकेषु भागेषु भूस्वामिनां कृषकाणां च विद्रोहाः तथा च आन्दोलनानि च एतासां समस्यानाम् अभिवृद्धिम् अकुर्वन्। कदाचित् एते विद्रोहाः वर्धमानानां करभाराणां विरुद्धं कदाचित् च एते शक्तिशालिभिः ग्रामप्रधानैः स्वस्य स्थितेः सुदृढीकरणस्य प्रयत्नाः आसन् । अतीते अपि विद्रोहिसमूहेन मुगलसत्तायै आह्वानानि प्रदत्तानि। परन्तु अधुना ईदृशैः समूहैः क्षेत्रस्य आर्थिकानां संसाधनानां प्रयोगः स्वस्य स्थितीनां सुदृढतायै कृतः । येन प्रकारेण शनैः शनैः राजनीतिकी आर्थिकी च सत्ता प्रान्ताधिपतीनां स्थानीय-ग्रामप्रधानानाम् अथवा अन्यसमूहानां नियन्त्रणाधीना जायमाना आसीत्, औरङ्गजेबस्य उत्तराधिकारिणः एतत् परिवर्तनम् अवरोद्धुं न शक्तवन्तः।

### विपुलं सस्यं रिक्तः कोषः

*केनापि तत्कालिनेन लेखकेन साम्राज्यस्य वित्तीय-परिक्षीणस्य वर्णनम् एतेषु शब्देषु कृतम् अस्ति। महान्तः भूस्वामिनः निस्सहायाः निर्धनाः च अभवन्। तेषां कृषकाः वर्षे सस्यद्वयम् उत्पादयन्ति, परन्तु ते उभयोरपि किमपि न प्राप्नुवन्ति । तेषां स्थानीयाः प्रतिनिधयः एकप्रकारेण कृषकाणां काष्ठपुत्तलिकाः इव भवन्ति यथा कृषकः स्वयं स्वस्य ऋणदातुः वशीभूतः भवति । यावत् पर्यन्तं सः सार्थिकस्य ऋणं न प्रत्यर्पयति। एवं प्रकारेण सम्पूर्णं प्रशासनं तथा च व्यवस्था एतावत् अव्यवस्थितं जातम् अस्ति यत् यद्यपि कृषकः विपुलं सस्यं सङ्गृह्णाति परन्तु तस्य स्वामी अर्थात् भूस्वामी तृणमात्रम् अपि न प्राप्नोति। ईदृश्यां स्थितौ भूस्वामिनः सशस्त्रसैन्यं कथं स्थापयितुं शक्नुवन्ति, यस्य आशा तेभ्यः भवति ? ते स्वस्य सैनिकान् ये युद्धकाले तेषाम् अग्रतः चलन्ति तथा च अश्ववाहकान् ये तेषां साक्षात् पृष्ठतः प्रचलन्ति धनं कुतः दास्यन्ति ?*

अस्मिन् राजनीतिके आर्थिके च सङ्कटकाले ईरानस्य शासकः नादिरशाहः १७३९ तमे वर्षे देहल्याम् आक्रमणं कृतवान् तथा च सम्पूर्णनगरं विलुण्ठ्य बृहन्मात्रायां धनादिकं नीतवान् । नादिरशाहस्य आक्रमणस्य अनन्तरम् अफगान-शासकः अहमदशाह-अब्दाली इत्यस्य आक्रमणानां परम्परा एव प्रचलिता आसीत्। सः १७४८ तः १७६१ पर्यन्तं पञ्चवारम् उत्तरभारते आक्रमणं कृत्वा महत् विलुण्ठनं कृतवान्।

## देहल्यां नादिरशाहस्य आक्रमणम्

*नादिरशाहस्य आक्रमणस्य परिणामतः देहल्यां यः विध्वंसः अभवत्, तस्य वर्णनं समकालिकाः प्रेक्षकाः अकुर्वन् । एतेषु केनचित् मुगलकोषात् धनलुण्ठनं विहितम् आसीत् तस्य वर्णनम् एवं प्रकारेण कृतम् अस्ति - सः षष्टिलक्षरूप्यकाणि सहस्रशः स्वर्णनाणकानि प्रायेण कोटिरूप्यकाणां स्वर्णपात्राणि, पञ्चाशतः कोटिरूप्यकाणाम् आभूषणानि, अन्यानि वस्तूनि च अनयत् । येषु कानिचन वस्तूनि एतावन्ति मूल्यवन्ति आसन् यत् विश्वे तत्सदृशं वस्तु न किञ्चित् अपरम् आसीत् यथा तख्तेहाउस अर्थात् मयूरसिंहासनम् इति ।*

*अन्यस्मिन् कस्मिंश्चित् वृतान्ते देहल्याम् आक्रमणस्य प्रभावस्य वर्णनं प्राप्यते -*

*ये कदाचित् स्वामिनः आसन्, अधुना महतीं दयनीयाम् अवस्थां प्राप्ताः आसन् । कस्मिँश्चित् काले येषां महान् आदरः यशः च आसीत्, ते अद्य पेयजलम् अपि न प्राप्नुवन्ति स्म । पृथक्तया निवस्यमानाः जनाः तेषां कोणेभ्यः आकृष्य बहिः निष्कासिताः । धनिकाः भिक्षुकाः कृताः । ये शृङ्गारप्रियाः जनाः आसन्, विविधप्रकारकाणि वस्त्राणि धृत्वा नव्यतां रीतिं वा चालयन्ति स्म ते अधुना नग्नभ्रमणम् आरब्धवन्तः आसन् तथा च येषां समीपे भूमेः सम्पत्तेः च न्यूनता न आसीत् ते अधुना गृहहीनाः जाताः आसन् । नवीनं नगरम् (शाहजहाँनावाद) अधुना मृत्तिकाराशिः अभवत् । नादिरशाहेन तदा नगरस्य पुरातनेषु प्रासादेषु आक्रमणं कृतं तथा च तत्रत्यः सम्पूर्णः वैभवसंसारः आमूलं नाशितः ।*



*चित्रम् - १*
*नादिरशाहस्य १७७९ तमस्य एकं चित्रम्*

साम्राज्यं सर्वतः सङ्कटैः आक्रान्तं जायमानम् आसीत्, अभिजातानां विभिन्नसमूहानां पारस्परिकी प्रतिद्वन्द्विता एतत् इतोऽपि दुर्बलम् अकरोत् । एते अभिजाताः ईरानीसमूहः तूरानीसमूहः (तुर्कमूलस्य) च इति विशाल-समूहद्वये विभक्ताः परवर्तिनः मुगलसम्राजः दीर्घकालं यावत् एषु अभिजातसमूहेषु एकस्य अथवा अपरस्य हस्तस्य काष्ठपुत्तलिकाः इव



आसन् । अतीव अपमानजनिका स्थितिः तदा उत्पन्ना अभवत्, यदा द्वयोः मुगलसम्राजोः फर्रूखसियरस्य आलमगीरद्वितीयस्य च (१७५४-१७५९) हत्या अभवत् तथा च अहमदशाहम् (१७४८-१७५४) शाह-आलम-द्वितीयम् इति अन्यौ सम्राजौ तयोः अभिजाताः काणम् अकुर्वन् ।

## नवीन-राज्यानाम् उदयः

मुगल-सम्राजां सत्तायाः पतनेन सह बृहतां प्रान्तानां प्रान्ताधिपतयः भूस्वामिनः च उपमहाद्वीपस्य विभिन्नभागेषु स्वशक्तिम् इतोपि वर्धितवन्तः । अष्टादशशताब्द्यां मुगलसाम्राज्यं शनैः शनैः अनेकेषु स्वतन्त्रेषु क्षेत्रीय-राज्येषु विकीर्णम् आसीत् । स्थूलतया अष्टादश-शताब्दस्य राज्यानि त्रिषु परस्पर-व्यापिसमूहेषु विभक्तुं शक्यन्ते – (१) अत्र अवध-बङ्गाल-हैदराबादसदृशानि तानि राज्यानि यानि पूर्वं मुगलप्रान्ताः आसन् । यद्यपि एतेषां राज्यानां शासकाः अतिशक्तिशालिनः तथा च प्रायः अधिकस्वतन्त्राः आसन् । ते मुगलसम्राजा सह स्वीयानाम् औपचारिक-सम्बन्धानां विच्छेदं न अकुर्वन् । (२) एतादृशानि राज्यानि यानि मुग्लानां पुरातन-शासनकाले देशस्य वतनजागीररूपेण स्वतन्त्राः आसन् । एतेषु केचन राजपूतप्रदेशाः अपि सम्मिलिताः आसन् तथा च (३) तृतीयायां श्रेण्यां मराठानां सिक्खानां राजपूतानां च प्रदेशाः आसन् । एते प्रदेशाः विभिन्नाकाराः आसन् । एतैः कठोरस्य दीर्घकालिकस्य च सशस्त्र-सङ्घर्षस्य अनन्तरं मुगलेभ्यः स्वातन्त्र्यं बलात् आहृतम् आसीत् ।

**चित्रम् – २**

अभिजातस्य सभायां स्वागतं कुर्वन् फर्रूखसियरः

## *पुरातन-मुगल-प्रान्ताः*

पुरातनेभ्यः मुगलप्रान्तेभ्यः येषाम् उत्तराधिकारिणां राज्यानाम् उद्भवः अभवत्, तेषु अवधः बङ्गालः हैदराबादः च इति त्रीणि प्रमुखाणि राज्याणि आसन् । एतानि त्रीणि एव राज्यानि उच्चैः मुगल-अभिजातैः स्थापितानि आसन् । एतेषां त्रयाणां राज्यानां संस्थापकाः सआदतखानः (अवधः ) मुर्शीद-कुलीखानः (बङ्गालः) आसफजाहः (हैदराबादतः) च एतादृशाः जनाः आसन् येषां मुगलराजसभायाम् उच्चस्थानम् आसीत् । मुगलसम्राजाः एतेषु विश्वसन्ति स्म । आसफजाहः तथा च मुर्शीद-कुली-खानः इत्यनयोः कृते सप्तसहस्रजातमानस्य सादतखान इत्यस्य च कृते षट्सहस्रजातमानस्य स्थानम् आसीत् ।

## हैदराबादः

निजाम-उल-मुल्क-आसफ-जाहः यः हैदराबादराज्यस्य स्थापनाम् अकरोत्, मुगल-भूपति-फर्रूखसियरस्य राजसभायाः अतीव शक्तिशाली सदस्यः आसीत् । तस्मै सर्वप्रथमम् अवधप्रान्तस्य प्रान्ताधिपत्यं प्रदत्तम् आसीत् तत्पश्चात् दक्कनस्य कार्यभारः प्रदत्तः आसीत् । १७२०-२२ मध्ये एव दक्कनप्रान्तानां प्रान्ताधिपत्य-कारणात् आसफ़जाहस्य पार्श्वे पूर्वम् एव राजनीतिकस्य तथा च वित्तीयप्रशासनस्य पूर्णं नियन्त्रणम् आसीत् । दक्कने भूयमानानाम् उपद्रवाणां तथा च मुगलराजसभायां प्रचल्यमानायाः प्रतिस्पर्धायाः लाभं स्वीकृत्य सः सत्ताम् अधिकृत्य तस्य क्षेत्रस्य वास्तविकः शासकः अभवत् ।

आसफ़जाहः स्वस्मै कुशलान् सैनिकान् प्रशासकान् उत्तरीभारतात् आनीतवान् आसीत् तथा च ते दक्षिणे नूतनान् अवसरान् प्राप्य प्रसन्नाः आसन् । सः अधिकारिणां नियुक्तिम् अकरोत् तथा च तेभ्यः जागीर इति प्रायच्छत् । यद्यपि असौ अधुना अपि मुगलसम्राजः सेवकः आसीत् तथा अपि सः महता स्वातन्त्र्येण शासनं चालयति स्म । देहलीशासनम् अपि तस्य कार्येषु किञ्चन अपि व्यवधानं न जनयति स्म तथा देहलीशासनम् अपि तस्य कार्येषु किञ्चन अपि व्यवधानं न जनयति स्म । मुगलभूपतिः तु केवलं निजाम-उल-मुल्क-आसफ-जाहद्वारा पूर्वतः एव स्वीकृतनिर्णयानां पुष्टिं करोति स्म ।

हैदराबाद-राज्यं पश्चिमे मराठानां विरुद्धं तथा च पठारीक्षेत्राणां स्वतन्त्र-तेलगु-सेनानायकैः सह युद्धकरणे सर्वदा व्यस्तं भवति स्म । पूर्वदिशायां निजाम-उल-मुल्क-आसफ-जाहः कोरोमण्डलतटे स्थिते समृद्धे वस्त्रोत्पादके स्वीयं नियन्त्रणं स्थापयितुम् आकाङ्क्षति स्म । परन्तु तस्य महत्त्वाकाङ्क्षायां तस्मिन् क्षेत्रे ब्रिटिशशक्त्याः उपस्थितिकारणेन अवरोधः जातः ।

**निजामसैन्यम्**

हैदराबादस्य निजामस्य निजीसैनिकानां वर्णनम् (१९७०) :

निजामस्य पार्श्वे ४०० गजानाम् आरोहिका अस्ति । तस्य पार्श्वे अनेके अश्वारोहिणः आसन् । एतेषाम् अत्यन्तं कुशलानां तथा च अतिसुन्दराणाम् अलङ्कृतानां अश्वारोहिणां साङ्केतिकं वेतनं शतात् अपि अधिकानि रूप्यकाणि वर्तन्ते.......

### *अवधम्*

बुरहान-उल-मुल्क-सआदत-खानः १७२२ तमे वर्षे अवधस्य प्रान्ताधिपतिः नियुक्तः कृतः आसीत् । मुगलसाम्राज्यस्य विघटनेन यानि राज्यानि निर्मितानि जातानि, तेषु एतत् राज्यं सर्वाधिकमहत्त्वपूर्णेषु राज्येषु अन्यतमम् आसीत् । अवधः समृद्धिशाली प्रदेशः आसीत् यः गङ्गानद्याः उर्वरापूर्णेषु क्षेत्रेषु विस्तीर्णः आसीत् तथा च उत्तरभारतस्य तथा च

बङ्गालस्य मध्यवर्त्ती वाणिज्य-मुख्यमार्गः अपि अस्मिन् एव प्रदेशे आसीत् । बुरहान-उल-मुल्कः अपि अवधस्य प्रान्ताधिपत्यं दीवानीसैन्यप्रशासनं च सहैव स्वाधीनम् अकरोत् । तथा च प्रान्तस्य राजनैतिकानां वित्तीयानां सैनिकानां च विषयाणां एकमात्रं प्रमुखः जातः आसीत् ।



चित्रम् – ३
बुरहान-उल-मुल्कः

*स्वीयराज्यस्य सुदृढकरणस्य प्रयत्नेषु मुगल-भूपतिः राजसभाकार्यालये अपि किमर्थं नियन्त्रणं संस्थापयितुम् इच्छन्ति स्म ?*

बुरहान-उल-मुल्कः अवधक्षेत्रे मुगलप्रभावं न्यूनीकर्तुं क्रियमाणेषु प्रयत्नेषु मुगलैः नियुक्तानाम् भूस्वामिनां सङ्ख्यायां न्यूनतां कृतवान् । तेन भूसम्पत्तेः (जागीर) आकारे अपि न्यूनता कृता । तथा च रिक्तपदेषु स्वस्य निष्ठावन्तः सेवकाः नियोजिताः । भ्रष्टाचारं निरोद्धुं भूस्वामिनाम् अभिलेखानां लेखानां च निरीक्षणं कृतम् तथा च प्रान्ताध्यक्षस्य (नवाब) राजसभया नियुक्तैः अधिकारिभिः सर्वेषां जनपदानां राजस्वस्य पुनः निर्धारणं कृतम् । सः अनेकषां राजपूतानां भूस्वामित्वं रुहेलखण्डस्य च अफगानाम् उर्वराकृषिभूमिं स्वराज्याधीनम् अकरोत् ।

राज्यम् ऋणं प्राप्तुं स्थानीयानां धनाढ्यानां श्रेष्ठिनां महाजनानां च उपरि आश्रितं भवति स्म । राज्यं राजस्वस्य च पणः सर्वाधिकाय मूल्यप्रदात्रे पणकर्त्रे प्रदीयते स्म । राजस्वकृषकाः (इजारेदार) राज्याय सुनिश्चित-मूल्यस्य प्रदानस्य वचनं प्रयच्छन्ति स्म । स्थानीयाः श्रेष्ठिनः अस्य पणस्य मूल्यप्रदानस्य राज्याय प्रामाणिकतां प्रयच्छन्ति स्म । अपरस्मिन् पक्षे पणकर्तृभ्यः करस्य मूल्याङ्कनाय तथा च तम् एकत्रीकरणाय पर्याप्तमात्रायां स्वतन्त्रता प्रदीयते स्म । उत्तमर्णसदृशाः महाजनसदृशाः च अनेके नवीनाः सामाजिकाः समूहाः राज्यस्य राजस्वप्रणाल्याः प्रबन्धं प्रभावितं कर्तुम् आरब्धवन्तः । पूर्वम् एतादृशं कदापि न अभवत् ।

## बङ्गालः

मुर्शीद-कुली-खानस्य नेतृत्वे बङ्गालः शनैः शनैः मुगलनियन्त्रणात् पृथक् अभवत् । मुर्शीद-कुली-खानः बङ्गालस्य सहायकः आसीत् अर्थात् प्रान्तस्य प्रान्ताधिपतेः प्रतिनियुक्तः आसीत् । यद्यपि मुर्शीद-कुली-खानः औपचारिकरूपेण प्रान्ताधिपतिः कदापि न अभवत् । तेन शीघ्रम् एव प्रान्ताधिपतेः पदेन सम्बद्धा सत्ता स्वाधीनीकृता । हैदराबादस्य अवधशासकस्य च शासकः इव सः अपि राज्यस्य राजस्वप्रशासने स्वीयं नियन्त्रणम् अस्थापयत् । बङ्गाले मुगलप्रभावं न्यूनं कर्तुं तेन सर्वे मुगलभूसम्पदधिकाराः

(जीगीर) उड़ीसां स्थान्तरिताः तथा च बङ्गालस्य राजस्वस्य बहुव्यापकं पुनर्निर्धारणं कर्तुम् आदेशः प्रदत्तः। सर्वेभ्यः भूपतिभ्यः (जमीदार) कठोरतापूर्वकं राजस्वं रोकधनरूपेण स्वीक्रियते स्म। परिणामतः बहुभिः भूपतिभिः महाजनेभ्यः उत्तमर्णेभ्यः च ऋणरूपेण धनं स्वीकरणीयं भवति स्म। ये जनाः राजस्वं दातुं न शक्नुवन्ति स्म तैः विवशीभूय स्वभूमेः विक्रयणं धनिकभूपतिभ्यः करणीयं भवति स्म।

एवं प्रकारेण अष्टादश शताब्द्यां किमपि क्षेत्रीयं राज्यम् अभवत् इति कारणेन भूस्वामिषु महत् परिवर्तनं जातम् हैदराबादे अवधे च राज्यस्य तथा च उत्तमर्णानां मध्ये यः घनिष्ठः सम्बन्धः आसीत्, सः अलीवर्दी-खानस्य शासनकाले (१७४०-१७५६) बङ्गाले अपि स्पष्टतया दृश्यते। तस्य शासनकाले जगतश्रेष्ठिनः उत्तमर्णस्य वित्तकोषः अत्यन्तं समृद्धशाली अभवत्।

चित्रम् – ४

अलीवर्दी-खानस्य राजसभा



यदि वयम् एतेषां राज्यानाम् अभिलक्षणानि व्यापकरूपेण पश्यामः, तर्हि वयं तेषु काश्चन सामान्यविशेषताः द्रक्ष्यामः । प्रथमं तु यद्यपि विशालराज्यानि ज्येष्ठमुगलैः अभिजातैः विशालराज्यानि स्थापितानि । एते अभिजाताः काश्चित् प्रशासनिकीः व्यवस्थाः प्रति सन्देहास्पदाः आसन्, याः तेभ्यः उत्तराधिकाररूपेण प्राप्ताः आसन् । विशेषतः ते भूसम्पत्ति-व्यवस्थाम् अत्यन्तं सन्देहदृष्ट्या पश्यन्ति स्म। द्वितीयं त्रीणि अपि राज्यानि करसङ्ग्रहाय राज्यस्य अधिकारिषु आश्रितानि न आसन्। हैदराबादः अवधः बङ्गालः च इति त्रिभिः राज्यै राजस्वं स्वीकर्तुं राजस्वकृषकैः सह पणः कृतः। पणप्रथा या मुगलैः पूर्णतया अस्वीकृता आसीत्, अष्टादशे शताब्दे समग्रे अपि भारते प्रसृता

अनेके राजपूतशासकाः मुगलानाम् आधिपत्यम् अङ्गीकृतवन्तः किन्तु मेवाड किमपि एतादृशं राज्यम् आसीत् यत् मुगलसाम्राज्याय आह्वाहनानि दत्तवत्। राणाप्रतापः १५७२ तमे वर्षे उदयपुरस्य मेवाडस्य च बृहत्तरं भागं स्वाधीनं कृत्वा मेवाडस्य राजा अभवत्। मुगलैः राणाप्रतापः तेषाम् आधिपत्यं स्वीकुर्यात् एतदर्थम् अनेकाः दूताः प्रेषिताः, किन्तु असौ स्वनिर्णये दृढः आसीत्।

अभवत्। तथापि ग्रामीणक्षेत्रे तस्य प्रभावे विभिन्नता आसीत्। एतेषु सर्वेषु क्षेत्रीयराज्येषु तृतीयं सामान्यं लक्षणम् एतत् आसीत् यत् एतेषु राज्येषु धनिकमहाजनानां धनिकवणिजां च परस्परं सम्बन्धस्य आविर्भावः प्रारब्धः। एते राजस्वकृषकाः शस्यशुल्कं स्वीकर्तृभ्यः पणकर्तृभ्यः ऋणरूपेण धनं प्रयच्छन्ति स्म। विनिमयरूपेण प्रतिभूरूपेण अथवा बन्धकरूपेण भूमिं स्थापयन्ति स्म। ते अस्याः प्रतिभुवः कर्मचारिणां साहाय्येन करस्वीकरणं कुर्वन्ति स्म। एवं प्रकारेण समस्ते भारते धनाढ्यानां पणकर्तॄणां महाजनानां च अस्यां नवीनायां राजनीतिक्यां व्यवस्थायां भागधरता वर्धमाना आसीत्।

## राजपूतानां देशसम्पत्तिः (वतनजागीर)

राजपूतानां देशसम्पत्तिः (वतनजागीर) बहवः राजपूतराजानः विशेषेण अम्बरस्य जोधपुरस्य च राजानौ मुगलव्यवस्थायां गौरवेण सेवारतौ आस्ताम्। विनिमयरूपेण तेभ्यः स्वभूसम्पत्तौ पर्याप्ततया स्वायत्ततायाः लाभं स्वीकर्तुम् अनुमतिः प्राप्ता आसीत्। अधुना अष्टादशशताब्द्याम् एते शासकाः स्वसमीपस्थ-क्षेत्रेषु स्वनियन्त्रणं स्थापयितुं प्रायासान् आरब्धवन्तः। जोधपुरस्य राजा अजीतसिंहः अपि मुगलराजसभायाः समूहराजनीतौ स्वस्य स्थानं सम्यक् अकरोत्।

एते प्रभावशालिनः राजपूतवंशाः गुजरातस्य मालवायाः च समृद्ध-प्रान्तानां प्रान्ताधिपतेः अधिकारम् उद्घोषितवन्तः। जोधपुरस्य राजा अजीतसिंहः गुजरातस्य प्रान्ताधिपतिः तथा च अम्बरस्य सवायी-राजा-जयसिंहः मालवायाः प्रान्ताधिपतिः अभवत्। भूपतिः जहान्दारशाहः १७१३ तमे वर्षे अजीतसिंहस्य जयसिंहस्य च एतयोः पदयोः नवीनीकरणम् अकरोत्। एताभ्यां स्वप्रदेशानां समीपस्थानां राजक्षेत्राणां केषाञ्चित् भागानाम् अधिग्रहणस्य प्रयासाः कृताः। जोधपुरस्य राजवंशः नागौरं जितवान् तथा च स्वस्य राज्ये मेलितवान्। सवाई-राजा जयसिंहः जयपुरे स्वस्य नूतनां राजधानीम् अस्थापयत्। तथा च तस्मै १७२२ तमे वर्षे आगरायाः प्रान्ताधिपतित्वम् अपि प्रदत्तम्। १७४० तमे दशके राजस्थाने मराठानां सैन्याभियानानि एतेषां देशीयराज्यानाम् उपरि अतिरिक्तं प्रभावं जनयितुम् आरम्भवन्ति। येन एतेषाम् अग्रे विस्तारः अवरुद्धः अभवत्।

**जयपुरस्य राजा जयसिंहः**

१७३२ तमे वर्षे कस्मिँश्चित् फारसीवृतान्ते राज्ञः जयसिंहस्य वर्णनम् -

राजाजयसिंहः स्वस्य सत्तायाः परमोत्कर्षे आसीत्। द्वादशवर्षाणि सः आगरायाः प्रान्ताधिपतिपदे आसीत् तथा च पञ्चवर्षाणि अथवा षड्वर्षाणि यावत् मालवायाः। तेषां पार्श्वे विशाला सेना अग्न्यस्त्राणि तथा च विपुलधनसम्पद् आसीत्। तस्य प्रभावक्षेत्रं देहल्याः आरभ्य नर्मदातटं यावत् विस्तीर्णम् आसीत्। इसमें चित्र ४B भी जोड़ें।

चित्रम् – ५

मेहरानगढम्
किला, जोधपुरम्



## स्वातन्त्र्य-प्राप्तिः

**सिक्खाः**

अष्टमे अध्याये भवद्भिः पठितं यत् सप्तदशशताब्द्याः अवधौ सिक्खाः केनचित् राजनीतिक-समुदायरूपेण गठिताः अभवन् । अनेन पञ्जाबः क्षेत्रीय-राज्यनिर्माणस्य वर्धनाय अवसरं प्राप्तवान् गुरुगोविन्दसिंहः १६९९ तमे खालसापन्थ इत्यस्य स्थापनायाः पूर्वं तथा च तस्मात् अनन्तरं राजपूतानां मुगलशासकानां च विरुद्धं युद्धम् अकरोत् । १७०८ तमे वर्षे गुरुगोविन्दसिंहस्य मृत्योः अनन्तरं बन्दाबहादुरस्य नेतृत्वे खालसा मुगलसत्तायाः विरुद्धं विद्रोहम् अकरोत् । सः बाबागुरुनानकस्य तथा च गुरुगोविन्दसिंहस्य नाम्नां नाणकानि रचयित्वा स्वस्य शासनं सार्वभौमम् इति असूचयत् । सतलुजनद्याः यमुनानद्याः च मध्ये क्षेत्रे तेन स्वस्य प्रशासनस्य व्यवस्था कृता । १७१५ तमे वर्षे बन्दाबहादुरस्य बन्धनं तथा च १७१६ तमे वर्षे तस्य मारणं कृतम् ।

खालसा इत्यनेन कः अभिप्रायः वर्तते ? किं भवन्तः स्मरन्ति यत् अस्मिन् विषये अष्टमे अध्याये भवद्भिः किं पठितम् ?

सिक्खाः अष्टादशशताब्द्यां बहूनां योग्यनेतॄणां नेतृत्वेषु आत्मानं आरम्भे 'समूहेषु' (जत्था) तथा च अनन्तरं 'मिसल' इति रूपेण सङ्घटितवन्तः। एतेषां समूहानां समानतायाः च संयुक्तसेना 'दलखालसा' इति कथ्यते स्म । तेषु दिनेषु दलखालसा वैशाखीपर्वणि दीपावलीपर्वणि च अमृतसरे मिलति स्म। एतेषु उपवेशनेषु ते सामूहिकान् निर्णयान् स्वीकुर्वन्ति स्म, येः 'गुरुमतामनि" (गुरोः प्रस्तावः)' इति कथ्यन्ते स्म। सिक्खाः रक्षासूत्रव्यवस्थाम् अस्थापयन्। सिक्खाः "राखी" इति व्यवस्थाम् अनुसृतवन्तः, यस्याः अन्तर्गतं कृषकेभ्यः तेषाम् उत्पादनस्य २० प्रतिशतं कररूपेण स्वीकृत्य विनिमये ते तान् संरक्षणं प्रयच्छन्ति स्म।

गुरुगोविन्दसिंहः खालसाम् अप्रेरयत् यत् शासनं तेषां भाग्ये वर्तते (शासनं करिष्यति खालसा)। खालसा स्वस्य सुनियोजितस्य सङ्घटनस्य कारणेन प्रथमं मुग्लानां प्रान्ताधिपतीनां विरुद्धं तथा च पुनः अहमदशाह-अब्दाली इत्यस्य विरुद्धं सफलं प्रतिरोधं प्राकटयत्। (अहमदशाह-अब्दाली मुग्लेभ्यः पञ्जाबस्य समृद्धं प्रान्तं तथा च सरहिन्दस्य सर्वकारं स्वाधीनम् अकरोत्)। खालसा १७६५ तमे वर्षे स्वस्य नाम्नां नाणकानि रचयित्वा सार्वभौमशासनस्य घोषणाम् अकारयत्। एतत् महत्त्वपूर्णं यत् नाणकेषु उत्कीर्णाः शब्दाः ते एव आसन्, ये बन्दाबहादुरस्य काले खालसायाः आदेशेषु प्राप्यन्ते।

अष्टादशशताब्द्याः अन्तिमभागे सिक्खक्षेत्राणि सिन्धोः यमुनापर्यन्तं विस्तीर्णानि आसन्। यद्यपि एतानि विभिन्नेषु शासकेषु विभक्तानि आसन् । एतेषु अन्यतमः महाराजः रणजीतसिंहः विभिन्न-सिक्खसमूहेषु पुनः ऐक्यं संस्थाप्य १७९९ तमे वर्षे लाहौरं स्वस्य राजधानीम् अकरोत्।



चित्रम् ६

दशमगुरुः गुरुगोविन्दसिंहः

## मराठा

मराठाराज्यं किञ्चन अन्यत् शक्तिशालि राज्यम् आसीत् । यत् मुगलशासनस्य निरन्तरं विरोधं कृत्वा उत्पन्नं जातम् आसीत् । शिवाजी (१६२७-१६८०) शक्तिशाली योद्धपरिवाराणां साहाय्येन कस्यचित् स्थायिशक्तिशालिनः राज्यस्य स्थापनाम् अकरोत् । अत्यन्तं गतिशीलाः कृषक-पशुचारकाः (कुनबी) मराठाणां सेनायाः मुख्याः आधाराः अभवन् । शिवाजीः प्रायद्वीपे मुगलेभ्यः आह्वानं प्रदातुम् अस्य सैन्यबलस्य प्रयोगम् अकरोत् । शिवाजिमहाराजस्य मृत्योः पश्चात् मराठाराज्ये प्रभाविशक्तिः चित्तपावनानां ब्राह्मणानां परिवाराणां हस्ते आसीत् । ये शिवाजिमहाराजस्य उत्तराधिकारिणां शासनकाले 'पेशवा' अर्थात् प्रधानमन्त्रिरूपेण स्वीयां सेवां प्रयच्छन्तः आसन् । पुणे मराठाराज्यस्य राजधानी अभवत् ।

पेशवानां निरीक्षणे मराठाभिः कस्यचित् अत्यन्तं सफलस्य सङ्घटनस्य विकासः कृतः ।

ते मुगलानां दुर्गपिधानक्षेत्रैः सह वैरं न स्वीकुर्वन् तेषां समीपात् मौनेन निष्क्रम्य नगरेषु उपनगरेषु च आक्रमणं कुर्वन्ति स्म तथा च मुगलसेनायाः सम्मुखागमनम् एतादृशक्षेत्रेषु कुर्वन्ति स्म यत्र अन्नसामग्र्याः प्राप्तेः सैन्यागमनमार्गाः च सरलतया अवरोद्धुं शक्यन्ते स्म । १७२० तः १७६१ पर्यन्तं मराठासाम्राज्यस्य बहुः विस्तारः अभवत् । तेन शनैः शनैः महत्या सफलतया च मुगलसाम्राज्यस्य सत्तायाः क्षतिः कृता । १७२० तमं दशकं यावत् मालवा तथा च गुजरातः मुगलेभ्यः अपाहृतौ ।

मराठानरेशः १७३० तमं दशकं यावत् समस्त-दक्कन-प्रायद्वीपस्य अधिपतिरूपेण मान्यतां प्राप्नोत् तथा च अस्मिन् क्षेत्रे 'चौथ' तथा च 'सरदेशमुखी' इत्येतयोः करस्वीकरणस्य अधिकारम् अपि प्राप्तवान् ।

१७३७ तमे वर्षे देहल्याम् आक्रमणं कृत्वा मराठाप्रभुत्वस्य सीमाः शीघ्रतया वर्धिताः । इमाः उत्तरक्षेत्रे राजस्थानं तथा च पञ्जाबं यावत्, पूर्वे बङ्गालम् उडीसां च यावत्, तथा च दक्षिणे कर्णाटकं तमिलं तेलुगुप्रदेशं यावत् विस्तीर्णाः अभवन् । एतेषां क्षेत्राणाम् औपचारिकरूपेण मराठासाम्राज्ये सम्मेलनं न कृतम् । परन्तु मराठाप्रभुसत्तायाः स्वीकरणस्य विधेः रूपेण तेभ्यः उपायनत्वेन धनस्वीकरणस्य आरम्भः कृतः । साम्राज्यस्य अस्मिन् विस्तारे ते साम्राज्यस्य अनेन विस्तारेण संसाधनानां भण्डारणं तु प्राप्नुवन्, परन्तु तदर्थं तैः तत्मूल्यम् अपि देयम् अभवत् । मराठानां सैन्याभियानानां कारणेन अन्यशासकाः अपि तेषां विरुद्धम् आसन् । परिणामतः मराठाः १७६१ तमे वर्षे पानीपतस्य तृतीये युद्धे अन्यशासकेभ्यः किञ्चन अपि साहाय्यं न प्राप्नुवन् ।



**चित्रम् – 7**

महाराजः रणजीतसिंहस्य खड्गम्

अन्तहीनैः सैन्याभियानैः सह मराठाभिः काचिद् प्रभावशालिनी प्रशासनव्यवस्था सज्जीकृता । यदा कस्मिंश्चित् क्षेत्रे एकवारं विजयाभियानं सम्पूर्णं भवति स्म तथा च मराठानां शासनं सुरक्षितं भवति स्म, तदा तत्र स्थानीयाः परिस्थितीः अवधार्य शनैः शनैः भूराजस्वस्य अभियाचना कृता । कृषेः प्रोत्साहनं वाणिज्यं च पुनरुत्थानं कृतम् । अनेन सिन्धिया, गायकवाडः तथा च भोंसलेसदृशाः मराठानायकाः शक्तिशालीसेनानां सम्पादनार्थं संसाधनानि प्राप्तुं शक्तवन्तः । १७२० तमे दशके मालवायां मराठाभियानैः तस्मिन् क्षेत्रे स्थितानां नगराणां हानिः नैव कृता । उज्जैनः सिन्धियायाः संरक्षणे तथा च इन्दौरः होल्करस्य आश्रये समृद्धौ जातौ । एते नगरे सर्वविधप्रकारेण विशाले समृद्धो च आस्ताम् तथा च ते महत्त्वपूर्णेन वाणिज्यिककेन्द्ररूपेण सांस्कृतिककेन्द्ररूपेण कार्यं कुर्वन्ती आस्ताम् । मराठाभिः नियन्त्रितेषु क्षेत्रेषु व्यापारस्य नूतनाः मार्गाः उद्घटिताः । चन्देरीक्षेत्रे उत्पादितानां कौशेयवस्त्राणां कृते राजधान्यां पुणेनगरे नूतनविपणिः प्राप्ता । बुरहानपुरं प्रथमम् आगरायाः सूरतस्य च मध्यभागस्य सीमाक्षेत्रे एव स्वस्य वाणिज्यस्य संलग्नम् आसीत् । परन्तु अधुना सः स्वस्य वाणिज्यस्य अन्तःक्षेत्रं वर्धयित्वा दक्षिणभागे पुणेनगरं तथा च नागपुरं, पूर्वभागे लखनऊनगरम् इलाहाबादं च सम्मिलितम् अकरोत् ।

**'चौथकरः'**
भूपतिभिः स्वीक्रियमाणस्य भूराजस्वस्य २५ प्रतिशतम् । दक्कने एतस्य स्वीकरणं मराठाजनाः कुर्वन्ति ।

**सरदेशमुखी**
दक्कने मुख्यराजस्वं सङ्ग्रहकर्त्रे प्रदीयमानस्य भूराजस्वस्य ९-१० प्रतिशतभागः ।

## जाटाः

अन्यराज्यानाम् इव जाटानाम् अपिसप्तदशे अष्टादशे वा शताब्दे सत्तायाः दृढीकरणम् अभवत् । तैः स्वस्य नेतुः चूडामनस्य नेतृत्वे देहल्याः पश्चिमे स्थितेषु क्षेत्रेषु स्वस्य नियन्त्रणं कृतम् । १६८० तमं दशकं यावत् तेषां प्रभुत्वं देहल्याः आगरायाः च द्वयोः राजकीयनगरयोः मध्यस्थक्षेत्रे प्रारब्धम् । वस्तुतः ते कस्मैचित् कालाय आगरानगरस्य अभिरक्षकाः एव जाताः ।

जाटजनाः समृद्धाः कृषकाः आसन् तथा च तेषां प्रभुत्वक्षेत्रे पानीपत-बल्लभगढसदृशानि नगराणि महत्त्वपूर्णानि वाणिज्यकेन्द्राणि जातानि । सूरजमलस्य शासनकाले भरतपुरं शक्तिशालिराज्यरूपेण प्रसिद्धम् अभवत् । १७३९ तमे वर्षे यदा नादिरशाहः देहल्याम् आक्रमणं कृत्वा अलुण्ठयत् तदा देहल्याः अनेकैः प्रतिष्ठितैः व्यक्तिभिः भरतपुरे आश्रयं स्वीकृतम् । नादिरशाहस्य पुत्रः जवाहिरशाहस्य पार्श्वे त्रिंशत्सहस्रं सैनिकाः आसन् । तेन विंशतिसहस्रं सैनिकाः मराठाभ्यः स्वीकृताः, पञ्चदशसहस्रं सैनिकाः सिक्खेभ्यः स्वीकृताः तथा च एतेषां बलेन मुग्लैः सह युद्धम् अकरोत् ।

यत्र भरतपुरस्य दुर्गं अतीव पारम्परिक्या शैल्या निर्मितम् आसीत्, तत्र एव दीगे जाटाः अम्बरस्य आगरायाः च शैलीनां समन्वयं कुर्वन्तः विशालस्य बाग-प्रासादस्य निर्माणम् अकारयन्। राजकीयां वास्तुकलायां येषां रूपाणां प्रथमतया शाहजहाँकाले विशेषेण प्रयोगः अभवत्, दीगस्य भित्तयः तेषां रूपाणाम्८ एव प्रारूपेण निर्मिताः आसन् (पञ्चमाध्यायस्य नवमाध्यायस्य च १२ तमं चित्रं पश्यन्तु)।

चित्रम् – ८

*अष्टादशशताब्द्याः दीगस्य राजप्रासादसमूहः। भवनस्य छदौ मुख्यसभाभवनस्य 'बाङ्गला-गुम्मदः' उपरि अवधानं कुर्वन्तु।*



अन्यत्र

**फ्रांसीसीक्रान्तिः (१७८९-१७९४)**

अष्टादशशताब्द्यां भारतस्य विभिन्नराज्यव्यवस्थासु सामान्यजनानां कृते स्वस्य सर्वकारीयेषु कार्येषु कार्यकरणस्य भागग्रहणस्य अधिकारः न्यूनः आसीत् । ईदृशी स्थितिः पश्चिमदेशेषु अपि अष्टादशशताब्दस्य अन्तिमदशकान् यावत् आसीत् । अमेरीकीक्रान्तिः (१७७६-१७८१) तथा च फ्रांसीसीक्रान्तिः एतां स्थितिम् अपि च एतेन सह अभिजातवर्गस्य सामाजिकानां राजनीतिकानां च प्राधिकाराणां कृते आह्वानं प्रयच्छत् ।

फ्रांसीसी-क्रान्तिकाले मध्यवर्गस्य कृषकैः शिल्पिभिः पादरीगणैः च अभिजातानां विशेषाधिकाराणां विरुद्धं सङ्घर्षः कृतः । तेषां मतम् आसीत् यत् समाजे कस्यापि समूहस्य जन्मसिद्धाः प्राधिकाराः न भवेयुः, अपितु जनानां सामाजिकस्थितिः योग्यतायाम् आश्रिता स्यात् । फ्रांसीसीक्रान्त्याः दार्शनिकाः एतत् परामृष्टवन्तः यत् सर्वेषां कृते नियमाः अवसराः च समानाः भवेयुः । तेषाम् एतत् अपि कथनम् आसीत् यत् सर्वकारस्य सत्ता जनैः निर्मिता भवेत् तथा च जनतायाः सर्वकारस्य कार्येषु योगदानं प्रदातुम् अधिकारः भवेत् । फ्रांसीसीक्रान्तिसदृशैः अमेरीकीक्रान्तिसदृशैः च आन्दोलनैः शनैः शनैः प्रजानां नागरिकेषु परिवर्तनं कारितम् ।

भारते नागरिकतायाः राष्ट्रिय-राज्यस्य लोकतान्त्रिक-अधिकाराणां च विचाराः नवदशशताब्दस्य अन्तिमेषु दशकेषु सुदृढाः अभवन् ।

## कल्पनां कुर्वन्तु



*भवन्तः अष्टादशशताब्दस्य शासकाः सन्ति । अधुना वदन्तु यत् भवन्तः स्वप्रान्ते स्वीयां स्थितिं दृढीकर्तुं किं किं करिष्यन्ति तथा च एवं कुर्वन्तः भवतां समक्षे के के विरोधाः समस्याः च उत्पादयितुं शक्यन्ते ।*

## पुनः स्मरन्तु

१ *निम्नलिखितान् योजयन्तु –*

| | |
|---|---|
| *प्रान्ताधिपतिः* | *राजस्व-कृषकः* |
| *सैनिकः* | *उच्च-अभिजातः* |
| *पणकर्ता* | *प्रान्तीय-प्रान्ताधिपतिः* |
| *मिस्लः* | *मराठा-कृषक-योद्धा* |
| *चौथकरः* | *मुगल-सैन्य-सेनापतिः* |
| *कुनबी* | *सिक्खियोद्धॄणां समूहः* |
| *उमरा* | *मराठैः स्थापितः करः* |

२ *रिक्तस्थानानि पूरयन्तु-*

*(क) औरङ्गजेबः..................दीर्घकालिकं युद्धम् अकरोत्।*

*(ख) उमरा तथा च भूपति-मुग्लः.........शक्तिशालिनि अङ्गानि आसन्।*

*(ग) आसफजाहः हैदराबाद-राज्यस्य स्थापना.....कृता।*

*(घ) अवधराज्यस्य संस्थापकः............आसीत्।*

३ *समुचितं सूचयन्तु-*

*(क) नादिरशाहः बङ्गाले आक्रमणम् अकरोत्।*

*(ख) सवायीराजा जयसिंहः इन्दौरस्य शासकः आसीत्।*

*(ग) गुरुगोविन्दसिंहः सिक्खानां दशमः गुरुः आसीत्।*

*(घ) पुणे अष्टादशे शताब्दे मराठानां राजधानी अभवत्।*

४ *सादत-खानस्य पार्श्वे केषां पदानाम् उत्तरदायित्वम् आसीत् ?*

## आयान्तु विचारयामः

५ *अवधस्य तथा च बङ्गालस्य प्रान्ताध्यक्षौ भूपतिप्रथां वारयितुं किमर्थं प्रयासम् अकुरुताम् ?*

६ *अष्टादशे शताब्दे सिक्खानां सङ्घटनं केन प्रकारेण कृतम् ?*

७ *मराठाशासकाः दक्कनस्य अपरभागे विस्तारं किमर्थं कर्तुम् इच्छन्ति स्म ?*

८ *आसफजाहः स्वस्य स्थितिं दृढीकर्तुं कासां नीतीनाम् अनुपालनम् अकरोत् ?*

९ *किं भवतां विचारेण अद्य महाजनाः सार्थिकाः च तादृशम् एव प्रभावं स्थापयन्ति, यथा अष्टादशे शताब्दे स्थापयन्ति स्म ?*

१० *किम् अध्याये उल्लिखितं किञ्चन अपि राज्यं भवतां स्वीये प्रान्ते विकसितम् आसीत् ? यदि आम् तर्हि भवतां विचारेण अष्टादशशताब्दस्य जनजीवनम् एकविंशशताब्दस्य जनजीवनरूपेण भिन्नम् आसीत् ?*

बीजशब्दाः

प्रान्ताधिपतिः

दलखालसा

मिस्लः

सैन्यम्

पणः

चौथकरः

सरदेशमुखी

## आगच्छन्तु कृत्वा पश्यामः

*११ अवधे बङ्गाले हैदराबादे च कयाचित् वास्तुकलया नूतनक्षेत्रीयया राजसभया च सह युक्तायाः संस्कृतेः विषये किञ्चिद् ज्ञानं कुर्वन्तु ?*

*१२ राजपूतेषु जाटेषु सिक्खेषु मराठासु च कस्यचित् एकस्य समूहस्य शासकानां विषये कासाञ्चित् अन्यासां कथानां ज्ञानं कुर्वन्तु ।*